National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(54): 192-195
© 2024 NJHSR
www.sanskritarticle.com

**डॉ. लालसिंहपठानिया**
प्राचार्यः (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

**Correspondence:**
**डॉ. लालसिंहपठानिया**
प्राचार्यः (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

# वैदिककवीनां मते तत्त्वविज्ञानस्य परिशीलनम्

**डॉ. लालसिंहपठानिया**

सामान्यतः तात्त्विकं यद्ज्ञानं तत्त्वज्ञानमिति कथ्यते। किन्त्वत्र विचार्यं खलु यद्वैदिककवीनां सामान्य-ज्ञानपेक्षया किमधिकं वैशिष्ट्यं तत्त्वज्ञानमभिदधति। यतो हि तत्त्वज्ञानमिति शब्दश्रवणात् ज्ञानस्य वैविध्यत्वमभिलक्ष्यते। तेन भासते यत्सामान्यविशेषविधा ज्ञानं द्विविधम्। वस्तुतः अस्याशय स्पष्टीकरण-मुपनिषत्स्वपि दृश्यते। यथा गीतोपनिषदि भगवता श्रीकृष्णेनोक्तम् - **'ज्ञानं तेऽयं सविज्ञानमिदं वक्ष्याम्यशेषतः।'**[1]

अत्र कथनस्य व्याख्यानं कुर्वता भगवता श्रीशङ्कराचार्यपादैः 'विज्ञानसहितं स्वानुभवसंयुक्तम्' इति शब्दार्थं प्रदर्शितम्। अमरकोशे तु अस्यातिनिपुणतया प्रतिपादनमस्ति -

**'मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।'**[2]

अत्र शिल्पशास्त्रादिकं विज्ञानशब्दार्थतया परिगृहितम्। आधुनिकास्तु विद्वांसः पाश्चात्यभाषायाः साईन्स-पदसमानार्थं विज्ञानपदं प्रयुञ्जते। तत्किमेवं विज्ञानपदमेकार्थमेव, उतास्ति काचिदेका सर्वानुगता परिभाषेति ? विषयेऽस्मिन् प्राच्या विपश्चितो मनीषिण एवं कथयन्ति यत् - **'विभिन्नं वस्तुजातमभिलक्षीकृत्य मूलान्वेषणं क्रमेणैकतत्त्वपर्यन्तं गतिर्ज्ञानम्। एकं तत्त्वं निरुढं मत्वा क्रमेण तस्यानन्तरूपताप्रतिपतिर्विज्ञानम्। विशिष्टज्ञानं विज्ञानम्, विविधं ज्ञानम्, विभेदेन ज्ञानं वा विज्ञामिति॥'**[3]

तत्रेयं ज्ञानप्रक्रिया प्रत्यक्षादिप्रमाणसिद्धमिदं जगदेव तावादालोच्यताम्। तत्र जाताः पदार्था यदि जानन्ति, चेष्टन्ते च तर्हि जीवा इति प्राणिन इति वा व्यपदिश्यन्ते। न हि तेषु जीवः प्राणो वेन्द्रियगोचरः। ज्ञानचेष्टन्तु यथाक्रमं शव इति जड इति च व्याहरन्ति लोकाः। हिताहितप्राप्तिपरिहार्थं कर्मैव चेष्टामुदीरयन्ति विद्वांसः। तदेव निर्गलितोर्थो यज्ज्ञानकर्मणी एव जीवतां जीवस्य लक्षणम्। तत्र ज्ञानकर्ममयस्यास्य जीववर्गस्य यः प्रभवः सोऽपि ज्ञानकर्मरूप एव स्यात्, कार्यकारणयोः सारूप्यात्, कारणगुणाः कार्यगुणान् आरभन्त इति न्यायाच्च।

अत्रेदमाशङ्क्यते - यत्र ज्ञानं कर्म चेत्युभयं प्रमाणसिद्धं तेषां मनुष्य-पशु-पक्षि-कृनि-कीटादीनां ससञ्ज्ञानां वृक्ष-लता-गुल्मादीनामन्तः सञ्ज्ञानाञ्च ज्ञानकर्मात्मिकारकत्वं शक्यमनुमातुम्; क्षित्यादयः पुनर्नितान्तमसञ्ज्ञा अचेतना जडाः कस्मादुत्पद्यते ? किं तेषां संसञ्ज्ञान्तः सञ्ज्ञसृष्टिकारणाद् भिन्नमेव किञ्चित् कारणम्।

अत्रेदमुत्तरम् - ससञ्ज्ञान्तः सञ्ज्ञसृष्टयोरिवासञ्ज्ञसृष्टेरपि तदेव ज्ञानकर्मात्मकं कारणम्, नान्यत् किञ्चित्। ये यावन्तश्च कारणगुणास्ते सर्वेऽपि गुणाः सर्वात्मना कार्ये विकसन्त्येवेति नायं नियमः। न हि पितुर्मातुर्वा सर्वे गुणाः सर्वात्मना पुत्रे दुहितरिवाऽनुवर्त्तन्ते। क्षित्यादिषु नितान्तमप्रस्फुटेऽपि ज्ञाने केन वा सूक्ष्मेक्षिका विचक्षणेन नाध्यक्षीक्रियन्त उत्पत्ति-स्थिति-विपरिणति-वृद्धि-क्षिति-विनष्ट्यः कर्मापरपर्यायाः षड्भावाविकाराः। किञ्च तस्या एवं क्षितेरवयवान्मृदो जलक्लिन्नाया अचिरादेव ससञ्ज्ञानां कृमिकीटादीनां प्रादुर्भावः किं नावलोक्यते ? अन्तः सञ्ज्ञानां वृक्षलतादीनान्तु तत उद्भवः स्पष्ट एव।

तस्मादस्फुटचैतन्या भवन्तु क्षित्यादयः, सर्वथा अचेतनास्तु तेऽपि न वक्तुं शक्याः । तथा चेयं सर्वापि सृष्टिर्ज्ञानकर्मात्मन एव कस्माच्चित् कारणादुत्पन्नेति निश्चप्रचम् ।

नन्वेवं मा भूत् क्षित्यादिषु ज्ञानस्य विकासः । तथापि ज्ञानकर्मात्मनः कारणात् समुद्भूतानां तेषां ज्ञानकर्ममयत्वाच्चेतनत्वं प्राप्तम् इति कतमचेतनानि तानि ? निर्विषयश्चैवमयचेतनपदप्रयोगः स्यात्, कारणस्य कार्येऽनुस्यूतत्वात् ज्ञानकर्मशून्यस्यार्थस्यात्यन्तमभावात् । न ह्यविकसदवस्थं नास्तीति शक्यमुद्धोषयितुम्, बीजादिष्वविकसदवस्थस्यापि वृक्षादेः सत्त्वस्य दार्शनिकमूर्धन्यैरभुपगमाद् इति चेत् । अत्रैवाहुः प्राञ्चो माहामुनयो न ह्यं पदार्थानां चेतनाचेतनत्वच्यपदेशो ज्ञानकर्ममयत्वस्वीकारात्, किन्तु सेन्द्रियनिरिन्द्रियत्वमूलः । केचित् सेन्द्रियाः पदार्थाः, अपरे निरिन्द्रियाः । ये न्यूनाधिकभावेन सेन्द्रियास्ते मनुष्य-पशु-पक्ष्यादयः तरु-लता-गुल्मादयश्च चेतना अर्धचेतना वा व्यपदिशन्ते । ये पुनर्निरिन्द्रिया भावाः क्षित्यादयस्ते जडा इत्यचेतना इति च प्रथन्ते । तदुक्तं चरके -

**'खादीन्यात्मा मनः कालो दिशश्च द्रव्यसङ्ग्रहः ।**
**सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनम् ॥'**[4]

तदित्थं सर्वप्रजाकारणभूतस्य सर्वप्रजात्मभूततया परात्मपदव्यपदेश्यस्य ज्ञानकर्मात्मनः प्रजापतेरंशभूतयोरनयोर्ज्ञानमेकरसं स्थिरं प्रशान्तं न कदापि कदाचिदपि विपरितवर्त्तते । ज्ञानस्यैकरसत्वमिदं विद्यारण्यस्वामिना पञ्चदश्याः तत्त्वविवेकाध्याये युक्तया स्थापितुम् । तदुक्तं तत्र -

**'शब्दस्पर्शादयो वेद्या वैचित्राज्जागरे पृथक् ।**
**ततो विभक्ता तत् संवदैकरूप्यान्न भिद्यते ॥**
**तथा स्वपनेऽत्रवेद्यन्तु स्थिरम् ।**
**तद्भेदोऽतस्तयोः संविदेकरूपा न भिद्यते ॥**
**सुप्तोत्थितस्य सौषुप्ततमोबोधो भवेत् स्मृतिः ।**
**साचाव बुद्धविषयाऽव बुद्धं तत्तदा तमः ॥**
**स बोधो विषयाद् भिन्नो न बोधात् स्वप्नबोधवत् ।**
**एवं स्थानत्रक्षयेऽप्येका संवित् तद्वद् दिनान्तरे ।**
**मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ।**
**नोदेति नास्तमेत्येको संविदेषा स्वयं प्रभा ॥**[5]

कर्म पुनस्तद् विपरितमनेकमनेकविधमस्थिरमप्रशान्तं सर्वदा विपरिवर्त्तते । एकत्वाद् एकरसत्वात् स्थिरत्वादेवेदं ज्ञानममृतं सिदति चोच्यते । अनेकत्वाद् अनेकविधत्वाद् अस्थिरत्वाच्चेदं कर्म मर्त्यं मृत्युरासीदिति चाभिलप्यते । तदुक्तं शतपथश्रुतौ दशमकाण्डे **'अर्धं ह वै प्रजापतेरात्मनो मर्त्यमासीद्, अर्धममृतम्'**[6] । श्रीमद्भगवद्गीतायामपि[7] इति ।

इत्येवमहं पदबोध्यस्य परमात्मनः सहसहात्मकत्वम् अमृतमृत्य्वात्मकत्वं च प्रतिपादितम् । किञ्चैमे ज्ञानकर्मणी निरुक्तया दिशा स्वभावातः पृथग्भूतेऽपि अन्योन्यमोतप्रोते, नानयोरन्येन विनाऽन्यदवतिष्ठते । इमे एव ज्ञानकर्मणी आगमशास्त्रेषु 'शिवशक्ति:' इत्युच्यते । ज्ञानं शिवः कर्म च तच्छक्तिः । शक्तिशक्तिमतोश्चाविनाभावः । अत एव श्रुतावनयोरन्तरान्तरीभावः श्रूयते -**'अन्तरं मृत्योरमृतं मृत्यावमृतमाहितम् ।'** इति

तदेवमन्योन्यमोतप्रोतयोरन्तरान्तरीभावमापन्नयोरविनाभूतयोर्द्वयोरपि शक्यमेकत्वमास्थातुम् । एकस्मादेव च तस्माज्ज्ञानकर्ममयात् परमात्मनोऽस्य सर्वस्य चेतनाचेतनप्रपञ्चस्य समुद्भवः । तदुक्तम् ऋक्संहितायाम् - **'एकं वा इदं विबभूम सर्वम् ॥'**[8]इति ।

यमेव सर्वजगत्कारणभूतो ज्ञानकर्ममयः परमात्मा पुरुष इत्यपि व्यपदिश्यते । पुरि शयनादेवास्या पुरुषत्वम् । सेन्द्रिया निरेन्द्रियाश्चेमाः सर्वाः प्रजालोकपरपर्याः पूरित्याख्यायन्ते । तासामभिन्ननिमित्तोपादानतया तत्रैव शयानस्यास्य पुरुषपदवाच्यता । तदुक्तं शतपथश्रुतौ -

**'स वा अयं पुरुषः सर्वासुपूर्षु पुरिशयः ।**
**सोऽस्यां पुरि शेते तस्मात् पुरुषः ॥'**[9]

गीतोपनिषद्यपि -

**'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।**
**यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः ॥'**[10]

इत्यादिनाऽस्येश्वरस्य लोकत्रावेशः पुरुषत्वं चोक्तम् ।

**'तेनेदं पूर्णं पुरुषेण सर्वम् ।**
**पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ।।'**[11]

इत्यादिमन्त्रश्रुतयोऽपि ज्ञानकर्ममयस्य तस्यैकस्य पुरुषस्यैव सर्वजगत्कारणत्वमुद्धोषयन्ति । सेयमनेकेष्वेकदर्शनरूपा ज्ञानप्रक्रिया । अथ ज्ञानकर्मात्मनि तस्मिन् पुरुषे ज्ञानाश्रितं कर्म सृष्टौ प्रवर्त्तते, निलीनकर्म तु ज्ञानं ततो निवर्त्तते प्रतिसर्गं प्रवर्त्तयति । तत स एक एवोर्णनाभिरिव सर्ग-प्रतिसर्गयोः प्रवर्त्तयिता ।

कथमयमेकस्माद् नानाविधः सर्गः प्रवर्त्तते, कथं ज्ञानकर्मात्मकमिदमेकतत्त्वं विश्वरूपतया विपरिणतम्, केन क्रमेण परिणामो विवर्त्तो वा, इत्यनुभव एव विज्ञानशब्देन व्याह्रियते । एतत्प्रधानं च शास्त्रं विज्ञानम्, सञ्चरः, सम्भूतिरपरा विद्येति च बहुविधैः शब्दैर्व्यपदिशन्ति स्म पुरातना महर्षयः । अनयोर्ज्ञानविज्ञानयरेव सर्वासां विद्यायामन्तर्भावः । अत एवानयोर्ज्ञाने भगवदुक्ता ज्ञातव्यस्य निरवशेषतोपपद्यते ।

अयमत्र स्फुटोऽभिप्रायो यद् ज्ञानकर्ममयाद् एकस्माद् पुरुषतत्त्वाद् पुरुषतत्त्वाद् अयं समस्तोऽपि विश्वप्रपञ्चो न स्वकारणे किलेतव्यम् । विलये च स एव कारणात्मा ज्ञानकर्ममयः पुरुषोऽवतिष्ठते । तत्र पुरुषो मैलिकतत्त्वं विश्वश्च यौगिकम् । मौलिकं तत्त्वं वृहणशीलत्वाद् ब्रह्मशब्देन प्रख्यायते शास्त्रेषु, अनेकयोगाज्जायमानं यौगिकं तु यज्ञशब्देन । ब्रह्मापरपर्यायं मौलिकं तत्त्वं सर्वत्रानुस्यूतं सर्वाधिष्ठानं यत्र विविच्यते तच्छास्त्रं ज्ञानप्रधानत्वाद् दर्शनशास्त्रं ब्रह्मविद्यामध्यात्मविद्याञ्च प्रवदन्ति विद्वान्सः । तस्य विस्तारभूतं यज्ञापराभिधानं यौगिकतत्त्वं यत्र प्रतिपाद्यते तच्छास्त्रं यज्ञविद्यां विज्ञानशास्त्रं चाचक्षते तद्विदः ।

ज्ञानेब्रह्मविद्यायामेकत्वं प्रधानम्, विज्ञाने यज्ञविद्यायान्तु नानात्वं प्रधानम्। **'एकं वा इदं विभभूम सर्वम् ', 'प्रजापतिस्त्वेवेदं सर्वं यदिदं किञ्च', 'तस्माद् वा एतस्मादाकाशः सम्भूतः'** इत्यादीनि वाक्यानि विज्ञानप्रधानानि। एकष्वेकत्वमुद्दिश्य नानात्वं विधीयते। 'सर्वं खल्विदं ब्रह्म', 'इमे लोकाः प्रजापति' इत्यादीनि वाक्यानि ज्ञानप्रधानानि। एषु नानात्वमुद्दिश्यैकत्वं विधीयते। तथा चैकस्य नानात्वानुभवो विज्ञानम्, नानात्वे चैकत्वदर्शनं ज्ञानम्।

मा स्मैतज्ज्ञानविज्ञानयोः स्वरूपं (व्याख्यातुरस्य) स्वोत्प्रेक्षितं निराधमं वा मन्यत विद्वांसः। अर्जुनं प्रति विज्ञानसहितं ज्ञानमुदेष्टुं प्रतिज्ञाय भगवता श्रीकृष्णेनोक्तैर्वचोभिरेतस्यैवार्थस्य स्फुटं प्रतिपत्तेः इति गीतायाः सप्तमाध्याय उक्तम् ।[12] इत्येवमेकस्यानेकात्मतावगमप्रवणं विज्ञानमुद्दिश्य श्रीमद्भगवद्गीतायामुक्तम्।[13]

इत्यादिनानेकस्यैकात्मतावगतिप्रधानं ज्ञानमुपदिष्टम्। पुनरग्रेऽप्युक्तम् -

**ये चैवसात्त्विका भावा राजसास्तामसाश्च ये।**
**मत्त एवेति तान् विद्धि।।'**[14]

इत्येवं विज्ञानमुपक्रम्य कथितम्।

**'बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।**
**वासुदेवः सर्वमिति।'**[15]

इत्येवं सर्वस्यैकवासुदेवात्मकत्वप्रतिपत्तिरूपे ज्ञाने उपसंहृतम्। ज्ञाने विज्ञानमुपयुज्यते। न हि विनेया एकपद एवास्य बहुधा विभिन्नस्य जगतो मूलमेकं ग्राहयितुं शक्याः, विज्ञानसाहाय्येन तु शक्याः, अत एव भगवता विज्ञानं पूर्वमुक्तम् 'विज्ञानसहितम्' इति विशेषणविधया विज्ञानोपन्यासेन तस्याप्राधान्यञ्च निर्दिष्टम्; ज्ञानोपयोगित्वात्तस्य। अतिमहतो वृक्षस्यातिलघुबीजात्मकता तस्य द्रोहादिक्रमेण नानारूपता निदर्शनं पुरस्सरमेव कथञ्चित् ग्राहयितुं शक्या, नास्त्युपायान्तरम्। एष एवार्थो श्रीमद्भागवते श्लोकद्वयेन सुस्पष्टं प्रतिपादितः। तथा हि

**'नवैकादश पञ्च त्रीन् भावान् भूतेषु येन वै।**
**ईक्षेतार्थैकमप्येष तज्ज्ञानं मम निश्चितम्।**
**एतदेव हि विज्ञानं न तथैकेन येन तत्।**
**स्थित्युत्पच्यप्ययन् पश्येद् भावानां त्रिगुणात्मनाम्॥'**[16]

अयमर्थः स्थूणारुन्धतीन्यायेन साधर्म्यवैधर्म्याभ्याम् एकादशं वा इदं सर्वम्, नवकं वा, पञ्चकं वा, त्रिकं वा इत्येवमनन्तानां भूतानां वर्गीकरणेनान्ते 'एकमिदं सर्वम्' इत्येवमीक्षेत येन तज्ज्ञानमित्युच्यते। यद्यपि विज्ञानमप्येतदेव, परं प्रकारोऽत्र भिद्यते, येन एकेनैव त्रिगुणानामगणेयानां भावानामुत्पत्तिस्थितिप्रलयान् यत्पश्येत्तद् विज्ञानमित्याख्यायते। कूर्मपुराणेऽपि -

'या स देवो भगवान् विद्यया वेद्यते परः ।[17] ज्ञानस्यास्मदुक्तं लक्षणन्तु स्पष्टं श्रीमद्भगवद्गीतोपनिषदि -

**'सर्वभूतेषु येनैकं भावमव्ययमीक्षते।**
**अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सत्त्विकम्॥'**[18]

अर्थादेकस्मादनेकस्मिन्नवतरणं विज्ञानं यज्ञविद्या। अनेकस्माद् एकस्मिन्नारोहणं ज्ञानं ब्रह्मविद्या। ब्रह्मविद्यातिरिक्ताः सर्वा अपि विद्या अनेकत्वप्राध्यान्याद् यज्ञविद्यायामर्थाद् विज्ञानमेवान्तर्भवति। आभ्यामेव ज्ञानविज्ञानाभ्यां मानवस्य कृतकृत्यता सम्पद्यते। तत्र विज्ञानमभ्युदयहेतुः ज्ञानन्तु निःश्रेसजनकम्।

इदमेव ज्ञानविज्ञानयुगलं मुख्यो धर्मः। अस्यैव यतोऽभ्युदयनिःश्रेयस्सिद्धिः स धर्म इत्यभ्युदयनिःश्रेयस्साधकत्वमाह भगवान् कणादः।'

तत्रेयं मूलान्वेषणक्रमेणैकतत्त्वगतिः सूक्ष्मेषु तत्त्वेषु न प्रायेण प्रत्यक्षसाध्या, अनुमानं वा शब्दं वावलम्ब्य विचारेणैवेयं प्रादुर्भवति। बुद्धिमनुसृत्य च निष्पाद्यमाने निर्णये प्रक्रियाभेदा मतभेदाश्च भृशं विजृम्भत एव; बुद्धिनामैकरूप्याभावे मतैक्यस्य तत्र दुर्लभत्वात्। प्रक्रियाया ऐक्यं तु सम्भावयितुमप्यशक्यम्। अथैकस्यानेकरूपतायां तु सुस्पष्टं प्रत्यक्षं प्रभवत्येवेति परोक्षरूपे प्रतिभासे ज्ञानशब्दः प्रत्यक्षे प्रत्यक्षायिते वा स्फूटे प्रतिभासे तु विज्ञानशब्दः स्थाने प्रवृत्तः। अत एव -

**'ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।'**[19]

**'ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।'**[20]

इत्यादिषु 'विज्ञानसहितं स्वानुभवसंयुक्तम्' इति शङ्कराचार्यप्रभृतिभिर्भाष्यिकृद्भिर्व्याख्यातम्। एकमूलान्वेषणं केवलं मोक्षोपयोगि। एकस्यानेकरूपताविचारस्तु व्यवहारोपयोगितामप्यावहति इति। क्रमेण व्यवहारोपयोगिनि ज्ञाने विज्ञानशब्दो मोक्षोपयोगिनि ज्ञाने तु ज्ञानशब्दो निरुढि गतः। तदभिप्रायेणैव - **'मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः॥'**[21]

इति तत्र भवानमरसिंहो बभाषे। अनेनैव, च पथाऽद्यत्वे वस्तुतत्त्वान्वेषणपरं 'साईन्स' इति नाम्ना प्रसिद्धशास्त्रं विज्ञानशब्देनैव संस्कृतविद्वांसः परिचिन्वन्ति। तत्राप्येकत्वस्य विस्तार एव शिक्ष्यत् इति।

वस्तुतस्तु मोक्षोपयोगि तत्त्वमपि यदा न केवलं परोक्षविधया, अपि तु अनुभवपर्यवसायितया प्रतिपद्यते तदा तदपि विज्ञानपदव्यपदेश्यतामेवावगाहते। तत एव तु भगवद्गीतासु **'ज्ञानं विज्ञानसहितम्'** इत्याद्यादिष्टम्।

न च शिल्पशास्त्रयोस्तत्र कापि कथा। अनुभवावसानमेव च तत्त्वज्ञानमविद्यानिवर्त्तकमाचक्षत आचार्याः तेन ज्ञानस्याप्युज्ज्वलता विज्ञानेन सम्पाद्यते। किञ्च परोक्षप्रतिभासरूपेज्ञाने ये मतभेदाः प्रक्रिययाभेदा वा विभिन्नदृशां विजृम्भन्ते, ते तत्र दर्शनसमाख्यां लभन्ते। तेषु दर्शनेषु दृष्टभेदप्रधानेषु पारस्परिकानां वाक्कलहानामपि भवति सम्भावना। विज्ञाने त्वनुभवावसाने प्रत्यक्षायिते प्रतिभासे न कापि विचारभेदस्यापि सम्भावना, दूरे तु विचारभेदमूलकाः कलहा इत्यहो विज्ञानस्य महिमा। एवमयं विज्ञानशब्दो दार्शनिकविचारे

अनुभवपर्यवसायितायां निरुढिं हत इति साधितम् । इत्थं क्रमेण विज्ञानशब्दस्यार्थविकासः, न तु मूलतोऽनेकार्थतेति भाव्यं सुधीभिः ।

अत्र केचिन्महानुभावा विद्वांसो विप्रतिपद्यन्ते यत् श्रीशङ्करभगवत्पादैर्गीताभाष्ये यद्व्याख्यातं विशिष्टं ज्ञानम्, विशेषणज्ञानम्, अनुभवावसानं प्रत्यक्षायितं ज्ञानम्, स एव विज्ञानशब्दार्थो दार्शनिकप्रक्रियायां ग्रहीतव्यः, लोके त्वर्थान्तरपरो भिन्नेव विज्ञानशब्दोऽस्तु । एकस्यानेकरूपताप्राप्तिरूपेऽर्थे तु न प्रमाणमिति ।

श्रीभागवतश्लोकमपि ते श्रीधरस्वामिरीत्या व्याख्याय अनुभवावसानतारूप एवार्थेऽनुकूलं मन्यन्ते । श्रीधरस्वामिभिर्हि - 'एतदेव हि विज्ञानं न तथैकेन येन यत् ।' इति भागवत पद्यार्द्धं 'यत् यदा येनैकेनानुगतानुगतान् एकात्मकान् भावान् पूर्वमैक्षत्, तांस्तथा पूर्वन्नेक्षेत (किन्तु तदैकं परमकारणं ब्रह्मैव), तदा एतदेव विज्ञानमुच्यते।' इत्येवं व्याख्यातम् ।

**'स्थित्युपत्त्यप्ययान् पश्येत् भावानां त्रिगुणात्मनाम् ।'**

इत्युत्तरार्द्धन्तु परान्वयितया योजितम् । तेन भेदनिरसनपूर्वकमेकत्वदर्शनं विज्ञानपदार्थः सिद्धयति । अनुभवावसाने ब्रह्मज्ञानेप्येकत्वमेवावशिष्यते, जगत्प्रतिमानविलोपः तत्र भवतीति श्रीभगवत्शङ्करपादैरेकवाक्यता सिद्धयति ।

**पाद टिप्पणी:**

1. श्रीमद्भगवद्गीता, 7.2
2. अमरकोशः, धीवर्गः, 5.6
3. महर्षिकुलवैभवम्, पृष्ठसङ्ख्या - 3
4. चरकसंहिता, 48
5. पञ्चदशी, तत्त्वविवेकाध्यायः
6. शतपथब्राह्मणम्, 10.1.1.3
7. 'अमृतं चैवं मृत्युश्च सदसच्चाहमर्जुन ।'
8. ऋग्वेदः, 8.58.2
9. शतपथब्राह्मणम्, 14.6.2.1
10. श्रीमद्भगवद्गीता, 15.17
11. शुक्लयजुर्वेदः, 31.2
12. ज्ञानं तेहं सविज्ञानमिदम्' इत्यादि प्रतिज्ञाय -
    'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
    अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
    अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
    जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥
    एतद्योनीनि भूतानि सर्वाजीत्युपधारय ॥' श्रीमद्भगवद्गीता, 7.4-6
13. अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।।
    मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ॥'
    'रसोऽहमप्सु कौन्तेय ॥' श्रीमद्भगवद्गीता, 7.6-8
14. श्रीमद्भगवद्गीता, 7.12
15. श्रीमद्भगवद्गीता, 7.19
16. श्रीमद्भागवतपुराणम, 11.29
17. साक्षाद्देवो महादेवस्तज्ज्ञानमिति कीर्तितम् ॥
    चतुर्दशानां विद्यानां धारणं हि यथार्थतः ।
    विज्ञानमिति तद्विधाद्येन धर्मो विवर्द्धते ॥ कूर्मपुराणम्, उत्तरखण्डः, अध्यायः -15)
18. गीतोपनिषत्, 18.3
19. गीतोपनिषत्, 7.2
20. गीतोपनिषत्, 8.1
21. अमरकोशः, धीवर्गः, 5.6